श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीशङ्कराचार्य विरचितं

# ॥ पवनसुत पञ्चरत्नम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ पवनसुत पञ्चरत्नम् ॥

यत्र यत्र रघुनाथ कीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम्।
बाष्पवारिपरिपूर्ण लोचनं मारुतिं नमत राक्षसान्तकम्॥

वीताखिलविषयेच्छं जातानन्दाश्रुपुलकमत्यच्छम्।
सीतापति दूताद्यं वातात्मजमद्य भावयेहृद्यम्॥ १ ॥

तरुणारुणमुखकमलम् करुणारसपूरपूरितापाङ्गम्।
सञ्जीवनमाशासे मञ्जुलमहीमानमञ्जनाभाग्यम्॥ २ ॥

शम्बरवैरिशरातिगं अम्बुजदलविपुललोचनोदारम्।
कम्बुगलमनिलदिष्टं बिम्बज्वलितोष्टमेकमवलम्बे॥ ३ ॥

दूरीकृतसीतार्तिः प्रकटीकृतरामवैभवस्फूर्तिः।
दारित दशमुखकीर्तिः पुरतोममपातु हनुमतोमूर्तिः॥ ४ ॥

वानरनिकराध्यक्षं दानवकुलकुमुदरविकर सदृक्षम्।
दीनजनावनदीक्षं पवनतपः पाकपुञ्जमद्राक्षम्॥ ५ ॥

एतत्पवन सुतस्यस्तोत्रं यः पठति पञ्चरत्नाख्यम्।
चिरमिह निखिलान्भोगान् भुक्त्वा श्रीरामभक्ति भाग्भवति॥ ६ ॥

॥ इति पवनसुत पञ्चरत्नम् सम्पूर्णम्॥